**This question paper contains 2 printed pages.** **May-June, 2024**

| | | |
|---|---|---|
| **Roll No.** | : | |
| **Unique Paper Code** | : | **121303408** |
| **Title of the Paper** | : | **संस्कृत उपन्यास तथा आधुनिक संस्कृत साहित्य का सर्वेक्षण** |
| | | **Sanskrit Novel and Survey of Modern Sanskrit Literature** |
| **Name of the Course** | : | **M.A., Sanskrit, LOCF** |
| **Type** | : | **OEC** |
| **Semester** | : | **IV** |
| **Duration** | : | **3 Hours** |
| **Maximum Marks** | : | **70** |

**Write your Roll No. on the top immediately on receipt of this question paper**
**(इस प्रश्नप्रत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाँक लिखिए ।)**

**Note:** Unless otherwise required in a question, answers should be written in **Sanskrit** or in **Hindi** or in **English** but the same medium should be used throughout the paper.

**टिप्पणी:** अन्यथा आवश्यक न होने पर इस प्रश्न-पत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** किसी एक भाषा में दीजिए, परन्तु सभी प्रश्नों का माध्यम एक ही होना चाहिए ।

1. निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए – 7X4=28
Explain the following with context –

(i) अहर्दिवं प्रवर्त्तमानायामस्यां चौर्यपरम्परायामेकदा निशीथे प्राविशमपरिचिते कुत्रचिदुटजे। दृश्यं तत्रत्यमासीदतिविस्मयावहम्। उटजे तस्मिन् न्यवसन् जनास्त्रयः - वृद्धः, वृद्धा, कुमारश्च। चौरविद्याप्रभावेण सर्वं तत्रत्यं सम्यगद्राक्षमपि। किन्तु न किमपि कस्माच्चिदपि कोणात् स्वापतेयं भोज्यं भोग्यं वा द्रष्टुमपार्यत। यस्य गृहे नास्त्येकोऽपि कणः कस्यचिदन्नस्य, नापि च कुत्रचिद् दृश्यते कांस्यभाजनमपि, स्थाली, जलपात्रमपि वा, कथं स वर्त्तयते जीविकाम्?

**अथवा/OR**

अथ कदाचित् राजा सपरिवारः पुनराश्रमपदं जगाम। न्यवेदयत स सहजैर्भावैः सर्वमिमं परमविस्मयावहं संस्कारवृत्तान्तं ब्रह्मर्षये। सर्वं तूष्णीमाकर्णितवत्यपि नालक्ष्यत कश्चित् प्रहर्ष उद्वेगो वा ब्रह्मर्षौ। ओमित्युक्त्वा क्षणं ध्यानमग्नः स बभूव। एतदभ्यन्तरे यज्ञशालाकर्मणि व्यापृतामाश्रममातरं प्रणम्य प्रतिनिवृत्ताः कुमारसहचराः राजमहिषीराजकुमारी-राजकुमाराः। क्रमेण सर्वेऽपि ते ब्रह्मर्षिमभ्यवादयन्।

(ii) पुनराजगाम सैव तिथिरष्टमी। कुमारश्चाजगाम राजधानीम्। प्रवचनात् पूर्वं पपात तस्य राजपरिवारे दृष्टिः। ऋते राजमहिष्याः कृत्स्नोऽपि चिन्ताशङ्काकुलो राजपरिवारः क्रान्तप्रज्ञमप्याकुलयदेव कुमारम्। प्रवचनान्ते कुमार इदम्प्रथमतयाऽद्य राजपरिवारं पृथक् समबोधयत्। पप्रच्छ च स राजानं 'किमिति लक्ष्यन्ते विषादरेखाः सर्वेषामेव भवतां मुखमण्डले। अपि किमपि शक्यते प्रतिविधातुमस्माभि'रिति।

**अथवा/OR**

दृष्ट्वैव तमद्य कुमारः स्वासनादुत्थाय नियतस्थान उपावेशयत्। अपृच्छच्च सः - त्वां दृष्ट्वैव सर्वे वयं प्रसीदामः। अपि सर्वं कुशलं ते? अपि समागतोऽसि श्रीमद्भगवद्गीतायाः पञ्चमाध्यायस्य तमष्टमं पश्यञ्छृण्वन्स्पृशन्नित्याद्यं श्लोकं पुनरनुशीलयितुम्? सर्वमद्य सुगमीकरिष्यामि। श्रान्तोऽसि मन्ये। प्रथमं जलमानयामि। पिब जलम्। निर्भरमुपविश। तातपादा अपि त्वां स्मरन्ति सदैव सस्नेहम्।

(iii) प्रतिगृहमनेके गुणकर्मविभागशः समुद्यमव्यवसायाः सुनिश्चिताः परस्पराश्रयाः स्वतन्त्राः सर्वोपकारकाः स्वसमीरिताः। न कुत्रचिदभावग्रस्तता कीदृगपि। सर्वेऽपि नराः सर्वा अपि नार्यः स्वयं वर्धिता यथाशक्ति यथाप्रतिभं यथा समवर्धयँश्च। अभावश्चैकान्त्येनाभवन् निरक्षरताया अकृतविद्यताया दीनताया अस्वच्छताया दुराचारिताया अशिष्टतायाः कृतघ्नतायाः सदवमाननाया अश्रद्धाऽविश्वासाविनयशीलताया हठधर्मताया विवादविद्याया मदधनस्य परपीडनशक्तेश्च।

**अथवा/OR**

यथापूर्वसङ्केतं राजकुमार एकदा राजधानीमाजगाम कुमारं राजानं द्रष्टुं लोकबन्धुम्। मनोहरसहचरः स प्रविवेश राजप्रासादम्। अवालोकयत् स नवदम्पती वाचयन्तौ रामायणीं कथां वीतभीतिचिन्तौ निराडम्बरौ निश्चाटुकारश्लाघावपि नितान्तश्लाघ्यानवद्यचरितौ। तत्र सस्वरं जगौ रामायणं लोकबन्धुः। अनुजगुस्तदन्ये श्रोतारः। राधा च भाष्यमकरोत्तदीयं लोकभाषया। सशिरःकम्पं सोल्लासमगायन्नशृश्वँश्च तां परमपावनीं रामकथां श्रोतारः सर्वेऽपि।

(iv) तत्रैवासीद् दृश्यमहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहशौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानप्राणहरणपरायणैः सत्सुयशोलुण्ठनकुशलैरशान्तिसैन्यशक्तिमत्तमस्य, नाम विभ्रतेऽपि विद्याया, अविद्योत्तमैः संस्थापितस्याविद्यास्थानस्याकृतविद्याविद्यार्थिसङ्कुलस्य, यत्र परस्पराघाता एवासन् महायज्ञानुष्ठानप्रतिनिधयः, कोलाहलाः कलहमया असंस्कृता एवासन् वेदध्वनिप्रतिनिधयः।

**अथवा/OR**

आकर्ण्यैव युवयोरालापक्रमे तव सन्देशामृतं तव शिष्यतामुपगतोऽस्मि गुरो। वयसा कनीयानपि त्वमसि भाजनं महाकरुणायाः करुणामहार्णवस्य कस्यचन। अभ्यस्ता मयाऽपि मैत्रीकरुणामुदिताः परमसिद्धिप्रदाः। त्वमसि तत्रापि सभवाप्तसमग्रसिद्धिरित्यालापादेव युवयोरहमज्ञासम्। स्वामी स वेषेणापि मनसा वचसा कर्मणापि च स्वामी नूनमेव स्वाम्यं भजके सर्वासामपि वृत्तीनाम्। त्रस्यापीयमेव समस्या। नास्था तस्यापि मानसे समुदेति कदाचिदुपेक्षापरिकर्मणि।

2. ब्रह्मर्षि **अथवा** कुमार का चरित्र–चित्रण कीजिए। 10
Describe the character of Brahmrṣi **or** Kumāra.

3. प्रमुख आधुनिक संस्कृत रूपकों पर एक निबन्ध लिखिए। 10
Write an essay on main modern Sanskrit dramas.

**अथवा/OR**

भट्ट मथुरानाथ शास्त्री के व्यक्तित्व एवं कर्तृत्व पर प्रकाश डालिए।
Throw light on the life and work of Bhatta Mathuranatha Shastri.

4. निम्नलिखित में से **किन्हीं चार** पर टिप्पणी लिखिए, जिनमें से कोई **एक** टिप्पणी **संस्कृत** में हो। 5+5+5+7=22
Write a short note on any **four** of the following, out of which **one** should be in **Sanskrit**.

| | |
|---|---|
| (क) मनोहर का चरित्रचित्रण | Description of character of Manohara |
| (ख) राजकुमारी का चरित्रचित्रण | Description of character of Prince. |
| (ग) कुमार का उपदेश | Kumar's preaching |
| (घ) राजमाता का चरित्रचित्रण | Description of character of Rajamata. |
| (ङ) हर्षदेव माधव | Harshdev Madhava |
| (च) हृषीकेश भट्टाचार्य | Hrishikesh Bhattacharya |
| (छ) रमा चौधुरी | Rama Chaudhuri |
| (ज) केशवचन्द्र दास | Keshavachandra Dasa |